॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

सप्तमकाण्डे पञ्चमः प्रश्नः

सत्रविशेषाभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

गावो वा एतथ् सत्रमासताशृङ्गाः सतीः शृङ्गाणि नो जायन्ता इति कामेन तासान्दशमासा
निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता उदतिष्ठन्नराथ्स्मेत्यथ यासान्नाजायन्त ताः सँव्वथ्स-
रमाप्त्वोदतिष्ठ न्नराथ्स्मेति यासाञ्चाजायन्त यासाञ्च न ता उभयीरुदतिष्ठन्नराथ्स्मेति गोसत्रँव्वै
॥ [१] ॥ सँव्वथ्सरो य एवँव्विद्वाꣳसः सँव्वथ्सरमुपयन्त्यृध्नुवन्त्येव तस्मात् तूपरा वार्षिकौ
मासौ पर्त्वा चरति सत्राभिजितꣳह्यस्यै तस्माथ् सँव्वथ्सरसदो यत् किञ्च गृहे क्रियते तदाप्त-
मवरुद्धमभिजितङ्क्रियते समुद्रँव्वा एते प्र प्लवन्ते ये सँव्वथ्सरमुपयन्ति यो वै समुद्रस्य पारन्न
पश्यति न वै स तत उदेति सँव्वथ्सरो ॥ [२] ॥ वै समुद्रस्तस्यैतत् पारँय्यदतिरात्रौ य एव-
व्विद्वाꣳसः सँव्वथ्सरमुपयन्त्यनार्ता एवोदृचङ्गच्छन्तीयँव्वै पूर्वोऽतिरात्रोऽसावुत्तरो मनः पूर्वो
वागुत्तरः प्राणः पूर्वोऽपान उत्तरः प्ररोधनम्पूर्वं उदयनमुत्तरो ज्योतिष्टोमो वैश्वानरोऽतिरात्रो
भवति ज्योतिरिव पुरस्ताद्दधते सुवर्गस्य लोकस्यानुख्यात्यै चतुर्विꣳशः प्रायणीयो भवति चतु-
र्विꣳशति रर्धमासाः ॥ [३] ॥ सँव्वथ्सरः प्रयन्त एव सँव्वथ्सरे प्रति तिष्ठन्ति तस्य त्रीणि
च शतानि षष्टिश्च स्तोत्रीयास्तावतीः सँव्वथ्सरस्य रात्रय उभे एव सँव्वथ्सरस्य रूपे आप्नुवन्ति
ते सꣳस्थित्या अरिष्ट्या उत्तरैरहोभिश्चरन्ति षडहा भवन्ति षड् वा ऋतवः सँव्वथ्सर ऋतुष्वेव
सँव्वथ्सरे प्रति तिष्ठन्ति गौश्चाऽऽ*युश्च मद्ध्यतः स्तोमौ भवतः सँव्वथ्सरस्यैव तन्मिथुनम्म-
द्ध्यतो ॥ [४] ॥ दधति प्रजननाय ज्योतिरभितो भवति विमोचनमेव तच्छन्दाꣳस्येव तद्विमो-

कय्ँन्त्यथो उभयतोज्योतिषैव षडहेन सुवर्गँल्लोकय्ँयन्ति ब्रह्मवादिनो वदन्त्यासते केन यन्तीति देवयानेन पथेति ब्रूयाच्छन्दाꣳसि वै देवयानः पन्था गायत्री त्रिष्टुब्जगतीज्योतिर्वै गायत्री गौस्त्रिष्टुगायुर्जगती यदेते स्तोमा भवन्ति देवयानेनैव ॥ [५] ॥ तत् पथा यन्ति समानꣳ साम भवति देवलोको वै साम देवलोकादेव नयन्त्यन्याअन्या ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेवान्यमन्यन्देवलोकमभ्यारोहन्तो यन्त्यभिवर्तो ब्रह्मसामम्भवति सुवर्गस्य लोकस्याभिवृत्या अभिजिद्भवति सुवर्गस्य लोकस्याभिजित्यै विश्वजिद्भवति विश्वस्य जित्यै मासिमासि पृष्ठान्युप यन्ति मासिमास्यतिग्राह्या गृह्यन्ते मासिमास्येव वीर्यन्दधति मासाम्प्रतिष्ठित्या उपरिष्टान्मासाम्पृष्ठान्युप यन्ति तस्मादुपरिष्टादोषधयः फलङ्गृह्णन्ति ॥ [६] ॥

(गोसत्रव्ँवा एति सव्ँवथ्सरो ऽर्द्धमासा मिथुनम्मध्यतो देवयानेनैव वीर्यं त्रयोदश च) ॥ १ ॥

गावो वा एतथ् सत्रमासताशृङ्गाः सतीः शृङ्गाणि सिषासन्तीस्तासान्दश मासा निषण्णा आसन्नथ शृङ्गाण्यजायन्त ता अब्रुवन्नराथ्स्मोत् तिष्ठामाव तङ्काममरुथ्स्महि येन कामेन न्यषदामेति तासामु त्वा अब्रुवन्नर्धावा यावतीर्वाऽऽसामहा एवेमौद्वादशौ मासौ सव्ँवथ्सरꣳ सपांद्योत् तिष्ठामेति तासां ॥ [७] ॥ द्वादशे मासि शृङ्गाणि प्रावर्तन्त श्रद्धया वाऽश्रद्धया वा ता इमा यास्तूपरा उभय्यो वाव ता आर्ध्नुवन्याश्च शृङ्गाण्यसन्वन्याश्चोर्जमवारुन्धतर्ध्नोति दशसु मासूँत्तिष्ठन्नृध्नोति द्वादशसु य एवव्ँवेद पदेन खलु वा एते यन्ति विन्दति खलु वै पदेन यन् तद्वा एतदृद्धमयनन्तस्मा देतद्गोसनि ॥ [८] ॥

(तिष्ठामेति तासां तस्माद् द्वे च) ॥ २ ॥

प्रथमे मासि पृष्ठान्युप यन्ति मद्ध्यम उप यन्त्युत्तम उप यन्ति तदाहुर्याव्ँवै त्रिरेकस्याह्न उपसीदन्ति दह्रव्ँवै साऽपराभ्यान्दोहाभ्यान्दुहेऽथ कुतः सा धोक्ष्यते यान्द्वादश कृत्व उपसीदन्तीति सव्ँवथ्सरꣳ सपांद्योत्तमे मासि सकृत् पृष्ठान्युपेयुस्तद्यजमाना यज्ञम्पशूनव रुन्धते

समुद्रव्वा ॥ [९] ॥ एतेनवारमपारम्प्र प्लवन्ते ये संव्वथ्सरमुपयन्ति यद् बृहद्रथन्तरे अन्वर्जे-
युर्यथा मद्ध्ये समुद्रस्य प्लवमन्वर्जेयुस्तादृक् तदनुथ्सर्गम्बृहद्रथन्तराभ्यामित्वा प्रतिष्ठाङ्गच्छन्ति
सर्वेभ्यो वै कामेभ्यः सन्धिर्दुहे तद्यजमानाः सर्वान् कामानव रुन्धते ॥ [१०] ॥
(समुद्रव्वै चतुस्त्रिꣳशच्च) ॥ ३ ॥

समान्य ऋचो भवन्ति मनुष्यलोको वा ऋचो मनुष्यलोकादेव न यन्त्यन्यदन्यथ् साम भवति
देवलोको वै साम देवलोकादेवान्यमन्यम्मनुष्यलोकम्प्रत्यवरोहन्तो यन्ति जगतीमग्र उप यन्ति
जगतीव्वै छन्दाꣳसि प्रत्यवरोहन्त्याग्रयणङ्ग्रहा बृहत् पृष्ठानि त्रयस्त्रिꣳशꣳस्तोमास्तस्माज्ज्या-
याꣳसङ्कनीयान् प्रत्यवरोहति वैश्वकर्मणो गृह्यतेविश्वान्येव तेन कर्माणि यजमाना अव रुन्धत
आदित्यो ॥ [११] ॥ गृह्यत इयव्वा अदितिरस्यामेव प्रति तिष्ठन्त्यन्योऽन्यो गृह्येते मिथुन-
त्वाय प्रजात्या अवान्तरव्वै दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव
तद्यजमानाः सृजन्त एताꣳ ह वा उदङ्कः शौल्बायनः सत्रस्यर्द्धिमुवाच यद्दशरात्रोयद्दशरात्रो
भवति सत्रस्यर्द्ध्या अथो यदेव पूर्वेष्वहस्सु विलोम क्रियते तस्यैवै षा शान्तिः ॥ [१२] ॥
(आदित्य स्तस्यैव द्वे च) ॥ ४ ॥

यदि सोमौ सꣳसुतौ स्यातांम्महति रात्रियै प्रातरनुवाकमुपाकुर्यात् पूर्वो वाचम्पूर्वो देवताः
पूर्वः छन्दाꣳसि वृङ्क्ते वृषण्वतीम्प्रतिपदङ्कुर्यात् प्रातस्सवनादेवैषामिन्द्रव्वृङ्क्तेऽथो खल्वाहुःसवन-
मुखेसवनमुखे कार्येति सवनमुखाथ् सवनमुखादेवैषामिन्द्रव्वृङ्क्ते सव्वेशायोपवेशाय गायत्रिया-
स्त्रिष्टुभो जगत्या अनुष्टुभः पङ्क्त्या अभिभूत्यै स्वाहा छन्दाꣳसि वै सव्वेश उपवेशः छन्दोभिरे-
वैषां ॥ [१३] ॥ छन्दाꣳसि वृङ्क्ते सजनीयꣳ शस्यव्विहव्यꣳ शस्यमगस्त्यस्य कयाशुभीयꣳ
शस्यमेतावद्वा अस्ति यावदेतद्यावदेवास्ति तदेषाव्वृङ्क्ते यदि प्रातस्सवने कलशो दीर्येत वैष्णवीषु
शिपिविष्टवतीषु स्तुवीरन्यद्वै यज्ञस्यातिरिच्यते विष्णुन्तच्छिपिविष्टमभ्यति रिच्यते तद्विष्णुः

शिपिविष्टोऽतिरिक्त एवातिरिक्तन्दधात्यथो अतिरिक्तेनैवातिरिक्तमाप्त्वाऽव रुन्धते यदि मद्ध्य-न्दिने दीर्येत वषट्कारनिधनꣳ साम कुर्युर्वषट्कारो वै यज्ञस्य प्रतिष्ठा प्रतिष्ठामेवैनद्गमयन्ति यदि तृतीयसवन एतदेव ॥ [१४] ॥

(छन्दोभिरेवैषा मवै कान्नविंꣳशतिश्च) ॥ ५ ॥

षडहैर्मासान्थ् सपांद्याहरुथ् सृजन्ति षडहैर्हि मासान्थ् सपंश्यन्त्यर्द्धमासैर्मासान्थ् सपां-द्याहरुथ् सृजन्त्यर्द्धमासैर्हि मासान्थ् सपंश्यन्त्यमावास्यया मासान्थ् सपांद्याहरुथ् सृजन्त्य-मावास्यया हि मासान्थ् सपंश्यन्ति पौर्णमास्या मासान्थ् सपांद्याऽहरुथ् सृजन्ति पौर्णमास्या हि मासान्थ् सपंश्यन्ति यो वै पूर्ण आसिञ्चति परा स सिञ्चति यः पूर्णादुदचति ॥ [१५] ॥ प्राणमस्मिन्थ्स दधाति यत् पौर्णमास्या मासान्थ् सपांद्याहरुथ् सृजन्ति सँव्वथ्सरायैव तत् प्राणन्दधति तदनु सत्रिणः प्राणन्ति यदहर्नोथ्सृजेयुर्यथा दृतिरुपनद्धो विपतत्येवꣳ सँव्वथ्सरो वि पतेदार्तिमार्च्छेयुर्यत् पौर्णमास्या मासान्थ्सपांद्याहरुथ् सृजन्ति सँव्वथ्सरायैव तदुदानन्द-धति तदनु सत्रिण उ ॥ [१६] ॥ दनन्ति नाऽऽ*र्तिमार्च्छन्ति पूर्णमासे वै देवानाꣳ सुतो यत् पौर्णमास्या मासान्थ्सपांद्याहरुथ् सृजन्ति देवानामेव तद्यज्ञेन यज्ञम्प्रत्यवरोहन्ति वि वा एतद्यज्ञञ्छिन्दन्ति यथ् षडहसंतंतꣳ संतमथाहरुथ् सृजन्ति प्राजापत्यम्पशुमा लभन्ते प्रजा-पतिः सर्वा देवता देवताभिरेव यज्ञꣳ सन्तन्वन्ति यन्ति वा एते सवनाद्येऽह ॥ [१७] ॥ रुथ् सृजन्ति तुरीयङ्खलु वा एतथ् सवनय्यँथ् सान्नाय्यय्यँथ् सान्नाय्यम्भवति तेनैव सवनान्न यन्ति समुपहूय भक्षयन्त्येतथ् सोमपीथा ह्येतर्हि यथायतनव्वा एतेषाꣳ सवनभाजो देवता गच्छन्ति येऽहरुथ् सृजन्त्यनुसवनम्पुरोडाशान् निर्वपन्ति यथायतनादेव सवनभाजो देवता अव रुन्ध-तेऽष्टाकपालान् प्रातस्सवन एकादशकपालान् माद्ध्यन्दिने सवने द्वादशकपालाꣴस्तृतीयसवने छन्दाꣴस्येवाऽऽ*प्त्वा ऽव रुन्धते वैश्वदेवञ्चरुन्तृतीयसवने निर्वपन्ति वैश्वदेवव्वै तृतीयसवनन्ते-नैव तृतीयसवनान्न यन्ति ॥ [१८] ॥

(उदच त्यु द्येऽह राप्त्वा पञ्चदश च) ॥ ६ ॥

उथ्सृज्यां(३)नोथ्सृज्या(३)मिति मीमाꣳसन्ते ब्रह्मवादिनस्तद्वाहुरुथ् सृज्यमेवेत्यमावास्या-याञ्च पौर्णमास्याञ्चोथ्सृज्यमित्याहुरेते हि यज्ञँव्वहत इति ते त्वाव नोथ्सृज्ये इत्याहुर्ये अवा-न्तरय्ँयज्ञम्भेजाते इति या प्रथमा व्यष्टका तस्यामुथ्सृज्यमित्याहुरेष वै मासो विशर इति नाऽऽ*दिष्ट ॥ [१९] ॥ मुथ्सृजेयुर्यदादिष्टमुथ्सृजेयुर्यादृशे पुनः पर्याप्लावे मद्ध्ये षडहस्य सपं-द्येत षडहैर्मासान्थ् सपांद्य यथ् सप्तम महस्तस्मिन्नुथ् सृजेयुस्तदग्नये वसुमते पुरोडाशमष्टाक-पालन्निर्वपेयुरैन्द्रन्दधीन्द्राय मरुत्वते पुरोडाशमेकादशकपालव्वैँश्वदेवन्द्वादशकपालमग्नेर्वै वसु-मतः प्रातस्सवनय्ँयदग्नये वसुमते पुरोडाशमष्टाकपालन्निर्वपन्ति देवतामेव तद्भागिनीङ्कुर्वन्ति ॥ [२०] ॥ सवनमष्टाभिरुप यन्ति यदैन्द्रन्दधि भवतीन्द्रमेव तद्भागधेयान्न च्यावयन्तीन्द्रस्य वै मरुत्वतो माद्ध्यन्दिनꣳ सवनय्ँयदिन्द्राय मरुत्वते पुरोडाशमेकादशकपालन्निर्वपन्ति देवतामेव तद्भागिनीङ्कुर्वन्ति सवनमेकादशभिरुप यन्ति विश्वेषांव्वै देवानामृभुमतां तृतीयसवनय्ँयद्वैश्वदेव-न्द्वादशकपालन्निर्वपन्ति देवता एव तद्भागिनीः कुर्वन्ति सवनन्द्वादशभि ॥ [२१] ॥ रुप यन्ति प्राजापत्यम्पशुमा लभन्ते यज्ञो वै प्रजापतिर्यज्ञस्यानन्नुसर्गायाभिवर्त इतः षण्मासो ब्रह्मसा-मम्भवति ब्रह्म वा अभिवर्तो ब्रह्मणैव तथ् सुवर्गँल्लोकमभिवर्तयन्तो यन्ति प्रतिकूलमिव हीतः सुवर्गो लोक इन्द्र क्रतुन्न आ भर पिता पुत्रेभ्यो यथा। शिक्षा नो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहीत्य मुत आयताꣳ षण्मासो ब्रह्मसामम्भवत्ययव्वै लोको ज्योतिः प्रजा ज्योतिरिममेव तल्लोकम्पश्यन्तोऽभिवदन्त आ यन्ति ॥ [२२] ॥

(नाऽऽदिष्टं कुर्वन्ति द्वादशभि रिति विꣳशतिश्च) ॥ ७ ॥

देवानाँव्वा अन्तञ्जग्मुषामिन्द्रियँव्वीर्यमपाक्रामत् तत् क्रोशेनावारुन्धत तत् क्रोशस्य क्रोश-त्वय्ँयत् क्रोशेन चात्वालस्यान्ते स्तुवन्ति यज्ञस्यैवान्तङ्गत्वेन्द्रियँव्वीर्यमव रुन्धते सत्रस्य-र्द्ध्याऽऽहवनीयस्यान्ते स्तुवन्त्यग्निमेवोपद्रष्टारङ्कृत्वर्द्धिमुप यन्ति प्रजापतेर्हृदयेन हविर्द्धा-नेऽन्तः स्तुवन्ति प्रेमाणमेवास्य गच्छन्ति श्लोकेन पुरस्ताथ् सदसः ॥ [२३] ॥ स्तुवन्त्यनु-श्लोकेन पश्चाद्यज्ञस्यैवान्तङ्गत्वा श्लोकभाजो भवन्ति नवभिरद्ध्वर्युरुद्गायति नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति सर्वा ऐन्द्रियो भवन्ति प्राणेष्वेवेन्द्रियन्दधत्यप्रतिहृताभिरुद्गायति

तस्मात् पुरुषः सर्वाण्यन्यानि शीर्ष्णोऽङ्गानि प्रत्यंचति शिर एव न पञ्चदशꣳरथन्तरम्भवती-
न्द्रियमेवाव रुन्धते सप्तदशं ॥ [२४] ॥ बृहदन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एक-
विꣳशम्भद्रन्द्विपदासु प्रतिष्ठित्यै पत्न्य उप गायन्ति मिथुनत्वाय प्रजात्यै प्रजापतिः प्रजा असृ-
जत सोऽकामयताऽऽ*सामहꣳ राज्यम्परीयामिति तासाꣳ राजनेनैव राज्यम्पर्यैत् तद्राजनस्य
राजनत्वँय्यद्राजनम्भवति प्रजानामेव तद्यजमाना राज्यम्परि यन्ति पञ्चविꣳशम्भवति प्रजा-
पते ॥ [२५] ॥ राप्त्यै पञ्चभिस्तिष्ठन्तः स्तुवन्ति देवलोकमेवाभि जयन्ति पञ्चभिरासीना मनु-
ष्यलोकमेवाभि जयन्ति दश संपद्यन्ते दशाक्षरा विराडन्नँविराड् विराजैवान्नाद्यमव रुन्धते
पञ्चधा विनिषद्य स्तुवन्ति पञ्च दिशो दिक्ष्वेव प्रतितिष्ठन्त्येकैकयाऽस्तुतया समायन्ति दिग्भ्य
एवान्नाद्यꣳ सम्भरन्ति ताभिरुद्गातोद्गायति दिग्भ्य एवान्नाद्यꣳ ॥ [२६] ॥ संभृत्य तेज आत्मन्
दधते तस्मादेकः प्राणः सर्वाण्यङ्गान्यवत्यथो यथा सुपर्ण उत्पतिष्यञ्छिर उत्तमङ्कुरुत एव-
मेव तद्यजमानाः प्रजानामुत्तमा भवन्त्यासन्दीमुद्गाताऽऽरोहति साम्राज्यमेव गच्छन्ति प्लेङ्खꣳ
होता नाकस्यैव पृष्ठꣳ रोहन्ति कूर्चावद्ध्वर्युर्ब्रध्नस्यैव विष्टपङ्गच्छन्त्येतावन्तो वै देवलोका-
स्तेष्वेव यथापूर्वम्प्रति तिष्ठन्त्यथो आक्रमणमेव तथ् सेतुँय्यजमानाः कुर्वते सुवर्गस्य लोकस्य
समष्ट्यै ॥ [२७] ॥

(सदसःसप्तदशंप्रजापतेर्गायति दिग्भ्य एवान्नाद्यंप्रत्येकादश च) ॥ ८ ॥

अर्क्येण वै सहस्रशः प्रजापतिः प्रजा असृजत ताभ्य इलांदेनेरालँलूतामवारुन्ध यदर्क्य-
म्भवति प्रजा एव तद्यजमानाः सृजन्त इलान्दम्भवति प्रजाभ्य एव सृष्टाभ्य इरालँलूतामव
रुन्धते तस्माद्याꣳ समाꣳ सत्रꣳ समृद्धङ्क्षोधुकास्ताꣳ समाम्प्रजा इषꣳ ह्यासामूर्जमाददते
याꣳ समाँव्यृद्धमक्षोधुकास्ताꣳ समाम्प्रजा ॥ [२८] ॥ न ह्यासामिषमूर्जमाददत उत्क्रो-
दङ्कुर्वते यथा बन्धान्मुमुचाना उत्क्रोदङ्कुर्वत एवमेव तद्यजमाना देवबन्धान्मुमुचाना उत्क्रोद-
ङ्कुर्वत इषमूर्जमात्मन् दधाना वाणः शततन्तुर्भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये
प्रति तिष्ठन्त्याजिन्धावन्त्यनभिजितस्याभिजित्यै दुन्दुभीन्थ् समाघ्नन्ति परमा वा एषा वाग्या
दुन्दुभौ परमामेव ॥ [२९] ॥ वाचमव रुन्धते भूमिदुन्दुभिमा घ्नन्ति यैवेमाँवाक् प्रविष्टा तामे-

वाव रुन्धतेऽथो इमामेव जयन्ति सर्वा वाचो वदन्ति सर्वासाँव्वाचामवरुद्ध्या आर्द्रेचर्मन् व्याय-
च्छेते इन्द्रियस्या वरुद्ध्या आऽन्यः क्रोशति प्रान्यः शꣳसति य आक्रोशति पुनात्येवैनान्थ्स
यः प्रशꣳसति पूतेष्वेवान्नाद्यन्दधात्यृषिकृतञ्च ॥ [३०] ॥ वा एते देवकृतञ्च पूर्वैर्मासैरव रुन्धते
यद्भूतेच्छदाꣳ सामानि भवन्त्युभयस्यावरुद्ध्यै यन्ति वा एते मिथुनाद्ये सँव्वथ्सरमुपयन्त्यन्त-
र्वेदि मिथुनौ सम्भवतस्तेनैव मिथुनान्न यन्ति ॥ [३१] ॥

(व्यृद्धमरख्षौधुकास्ताꣳ समाम्प्रजाः परमामेव च त्रिꣳशच्च) ॥ ९ ॥

चर्मेव भिन्दन्ति पाप्मानमेवैषामव भिन्दन्ति माऽप राथ्सीर्माऽति व्याथ्सीरित्याह संप्रत्येवै-
षाम्पाप्मानमव भिन्दन्त्युदकुम्भानधिनिधाय दास्यो मार्जालीयम्परि नृत्यन्ति पदो निघ्नतीरिदं-
मधुङ्गायन्त्यो मधु वै देवानाम्परममन्नाद्यम्परममेवान्नाद्यमव रुन्धते पदो नि घ्नन्ति महीयामेवैषु
दधति ॥ [३२] ॥

(चर्मै कान्नपञ्चाशत्) ॥ १० ॥

पृथिव्यै स्वाहाऽन्तरिख्षाय स्वाहा दिवे स्वाहा संप्लोष्यते स्वाहा संप्लवमानाय स्वाहा संप्लुताय
स्वाहा मेघायिष्यते स्वाहा मेघायते स्वाहा मेघिताय स्वाहा मेघाय स्वाहा नीहाराय स्वाहा
निहाकायै स्वाहा प्रासचाय स्वाहा प्रचलाकायै स्वाहा विद्योतिष्यते स्वाहा विद्योतमानाय स्वाहा
सँव्विद्योतमानाय स्वाहा स्तनयिष्यते स्वाहा स्तनयते स्वाहोग्रꣳ स्तनयते स्वाहा वर्षिष्यते
स्वाहा वर्षते स्वाहाऽभिवर्षते स्वाहा परिवर्षते स्वाहा सँव्वर्षते ॥ [३३] ॥ स्वाहाऽनुव-
र्षते स्वाहा शीकायिष्यते स्वाहा शीकायते स्वाहा शीकिताय स्वाहाप्रोषिष्यते स्वाहा प्रुष्णते
स्वाहा परिप्रुष्णते स्वाहोद्ग्रहीष्यते स्वाहो द्गृह्णते स्वाहोद्गृहीताय स्वाहा विप्लोष्यते स्वाहा विप्लव-
मानाय स्वाहा विप्लुताय स्वाहाऽऽतफ्स्यते स्वाहाऽऽतपते स्वाहोग्रमातपते स्वाहर्ग्भ्यः स्वाहा
यजुर्भ्यः स्वाहा सामभ्यः स्वाहाऽङ्गिरोभ्यः स्वाहा वेदेभ्यः स्वाहा गाथाभ्यः स्वाहा नाराशꣳ-
सीभ्यः स्वाहा रैभीभ्यः स्वाहा सर्वस्मै स्वाहा ॥ [३४] ॥

(सँव्वर्षते रैभीभ्यः स्वाहा द्वे च) ॥ ११ ॥

दत्वते स्वाहाऽदन्तकाय स्वाहा प्राणिने स्वाहाऽप्राणाय स्वाहा मुखवते स्वाहाऽमुखाय स्वाहा नासिकवते स्वाहाऽनासिकाय स्वाहाऽक्ष्णवते स्वाहाऽनक्षिकाय स्वाहा कर्णिने स्वाहाऽकर्णकाय स्वाहा शीर्षण्वते स्वाहाऽशीर्षकाय स्वाहा पद्वते स्वाहाऽपादकाय स्वाहा प्राणते स्वाहाऽप्राणते स्वाहा वदते स्वाहाऽवदते स्वाहा पश्यते स्वाहाऽपश्यते स्वाहा शृण्वते स्वाहाऽशृण्वते स्वाहा मनस्विने स्वाहा ॥ [३५] ॥ ऽमनसे स्वाहा रेतस्विने स्वाहाऽरेतस्काय स्वाहा प्रजाभ्यः स्वाहा प्रजननाय स्वाहा लोमवते स्वाहाऽलोमकाय स्वाहा त्वचे स्वाहाऽत्वक्काय स्वाहा चर्मण्वते स्वाहाऽचर्मकाय स्वाहा लोहितवते स्वाहाऽलोहिताय स्वाहा माꣳसन्वते स्वाहाऽमाꣳसकाय स्वाहा स्नावभ्यः स्वाहाऽस्नावकाय स्वाहा स्थन्वते स्वाहाऽनस्थिकाय स्वाहा मज्जन्वते स्वाहाऽमज्जकाय स्वाहाऽङ्गिने स्वाहाऽनङ्गाय स्वाहाऽऽत्मने स्वाहाऽनात्मने स्वाहा सर्वस्मै स्वाहा ॥ [३६] ॥

(मनस्विने स्वाहा ऽनात्मने स्वाहा द्वे च) ॥ १२ ॥

कस्त्वा युनक्ति स त्वा युनक्तु विष्णुस्त्वा युनक्त्वस्य यज्ञस्यर्ध्यै मह्यꣳ सन्नत्या अमुष्मै कामायाऽऽ*युषे त्वा प्राणाय त्वाऽपानाय त्वा व्यानाय त्वा व्युष्ट्यै त्वा रय्यै त्वा राधसे त्वा घोषाय त्वा पोषाय त्वाऽऽराद्घोषाय त्वा प्रच्युत्यै त्वा ॥ [३७] ॥

(कस्त्वा ऽष्टात्रिꣳशत्) ॥ १३ ॥

अग्नये गायत्राय त्रिवृते राथन्तराय वासन्तायाष्टाकपाल इन्द्राय त्रैष्टुभाय पञ्चदशाय बार्हताय ग्रैष्मायैकादशकपालो विश्वेभ्यो देवेभ्यो जागतेभ्यः सप्तदशेभ्यो वैरूपेभ्यो वार्षिकेभ्यो द्वादशकपालो मित्रावरुणाभ्यामानुष्टुभाभ्यामेकविꣳशाभ्यां वैराजाभ्याꣳ शारदाभ्याम्प-

यस्या बृहस्पतये पाङ्क्ताय त्रिणवाय शाक्कराय हैमन्तिकाय चरुः सवित्र आतिच्छन्दसाय त्रयस्त्रिꣳशाय रैवताय शैशिराय द्वादशकपालोऽदित्यै विष्णुपत्न्यै चरुरग्नये वैश्वानराय द्वादशकपालोऽनुमत्यै चरुः काय एककपालः ॥ [३८] ॥

(अग्नयेऽदित्या अनुमत्यै सप्तचत्वारिꣳशत्) ॥ १४ ॥

यो वा अग्नावग्निः प्रह्रियते यश्च सोमो राजा तयोरेष आतिथ्यय्ँयदग्नीषोमीयोऽथैष रुद्रो यश्चीयते यथ् संचितेऽग्नावेतानि हवीꣳषि न निर्वपेदेष एव रुद्रोऽशान्त उपोत्थाय प्रजाम्पशून् यजमानस्याभि मन्येत यथ् संचितेऽग्नावेतानि हवीꣳषि निर्वपति भागधेयेनैवैनꣳ शमयति नास्य रुद्रोऽशान्त ॥ [३९] ॥ उपोत्थाय प्रजाम्पशूनभि मन्यते दश हवीꣳषि भवन्ति नव वै पुरुषे प्राणा नाभिर्दशमी प्राणानेव यजमाने दधात्यथो दशाक्षरा विराडन्नव्विराड् विराज्येवान्नाद्ये प्रति तिष्ठत्यृतुभिर्वा एष छन्दोभिः स्तोमैः पृष्ठैश्चेतव्य इत्याहुर्यदेतानि हवीꣳषि निर्वपत्यृतुभिरेवैनञ्छन्दोभिः स्तोमैः पृष्ठैश्चिनुते दिशः सुषुवाणेना ॥ [४०] ॥ भिजित्या इत्याहुर्यदेतानि हवीꣳषि निर्वपति दिशामभिजित्या एतया वा इन्द्रन्देवा अयाजयन् तस्मादिन्द्रसव एतया मनुम्मनुष्यास्तस्मान्मनुसवो यथेन्द्रो देवानाय्ँयथा मनुर्मनुष्याणामेवम्भवति य एवव्ँविद्वानेतयेष्ट्या यजते दिग्वतीः पुरोऽनुवाक्या भवन्ति सर्वासान्दिशामभिजित्यै ॥ [४१] ॥

(अशान्तः सुषुवाणेनैकचत्वारिꣳशच्च) ॥ १५ ॥

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव। य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम॥ उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टङ्गृह्णामि तस्य ते द्यौर्महिमा नक्षत्राणि रूपमादित्यस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ॥ [४२] ॥

(यः प्राणतो द्यौरादित्यौ ऽष्टात्रिꣳशत्) ॥ १६ ॥

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषय्यँस्य देवाः। यस्य छायाऽमृतय्यँस्य मृत्युः कस्मै देवाय हविषा विधेम॥ उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टङ्गृह्णामि तस्य ते पृथिवी महिमौषधयो वनस्पतयो रूपमग्निस्ते तेजस्तस्मै त्वा महिम्ने प्रजापतये स्वाहा ॥ [४३] ॥

(य आत्मदाः पृथिव्यग्निरेकान्नचत्वारिꣳशत्) ॥ १७ ॥

आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाऽस्मिन् राष्ट्रे राजन्य इषव्यः शूरो महारथो जायतान्दोग्ध्रीधेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽऽस्य यजमानस्य वीरो जायतान्निकामेनिकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्ताय्यँोगक्षेमो नः कल्पताम् ॥ [४४] ॥

(आ ब्रह्म न्नेकचत्वारिꣳशत्) ॥ १८ ॥

आऽक्रान् वाजी पृथिवीमग्निय्यँुजमकृत वाज्यर्वाऽऽक्रान् वाज्यन्तरिक्षव्वाँयुय्यँुजमकृत वाज्यर्वा द्याव्वाँज्याऽक्रꣳस्त सूर्यय्यँुजमकृत वाज्यर्वाऽग्निस्ते वाजिन् युङ्नु त्वाऽऽरभे स्वस्ति मा सम्पारय वायुस्ते वाजिन् युङ्नु त्वाऽऽरभे स्वस्ति मा सं ॥ [४५] ॥ पारयाऽऽदित्यस्ते वाजिन् युङ्नु त्वाऽऽरभे स्वस्ति मा सम्पारय प्राणधृगसि प्राणम्मे दृꣳह व्यानधृगसि व्यानम्मे दृꣳहाऽपानधृगस्यपानम्मे दृꣳह चक्षुरसि चक्षुर्मयि धेहि श्रोत्रमसि श्रोत्रम्मयि धेह्यायुरस्यायुर्मयि धेहि ॥ [४६] ॥

(वायुस्ते वाजिन् युङ्नु त्वाऽऽरभे स्वस्ति मा सं त्रिचत्वारिꣳशच्च) ॥ १९ ॥

जज्ञि बीजव्वँष्टा पर्जन्यः पक्ता सस्यꣳ सुपिप्पला ओषधयः स्वधिचरणेयꣳ सूपसदनोऽग्निः स्वध्यक्षमन्तरिक्षꣳसुपावः पवमानः सूपस्थाना द्यौः शिवमसौ तपन् यथापूर्वमहोरात्रे पञ्चदशिनोऽर्धमासास्त्रिꣳशिनो मासाः कॢप्ता ऋतवः शान्तः सव्वँथ्सरः ॥ [४७] ॥

(जज्ञि बीज मेकत्रिꣳशत्) ॥ २० ॥

आग्नेयोऽष्टाकपालः सौम्यश्चरुः सावित्रोऽष्टाकपालः पौष्णश्चरू रौद्रश्चरुरग्नये वैश्वानराय द्वादशकपालो मृगाखरे यदि नाऽऽ*गच्छेदग्नयेऽꣳहोमुचेऽष्टाकपालः सौर्यम्पयो वायव्य आज्य-भागः ॥ [४८] ॥

(आग्नेय श्चतुर्विꣳशतिः) ॥ २१ ॥

अग्नयेऽꣳहोमुचेऽष्टाकपाल इन्द्रायाऽꣳहोमुच एकादशकपालो मित्रावरुणाभ्यामागोमु-ग्भ्याम्पयस्या वायोसावित्र आगोमुग्भ्याञ्चरुरश्विभ्यामागोमुग्भ्यान्धाना मरुद्भ्य एनोमुग्भ्यः सप्तकपालो विश्वेभ्यो देवेभ्य एनोमुग्भ्यो द्वादशकपालोऽनुमत्यै चरुरग्नये वैश्वानराय द्वादशक-पालो द्यावापृथिवीभ्यामꣳहोमुग्भ्यान्द्विकपालः ॥ [४९] ॥

(अग्नयेऽꣳहोमुचे त्रिꣳशत्) ॥ २२ ॥

अग्नये समनमत् पृथिव्यै समनमद्यथाऽग्निः पृथिव्या समनमदेवम्मह्यम्भद्राः संनतयः सन्न-मन्तु वायवे समनमदन्तरिक्षाय समनमद्यथा वायुरन्तरिक्षेण सूर्याय समनमद्दिवे समनम-द्यथा सूर्यो दिवा चन्द्रमसे समनमन्नक्षत्रेभ्यः समनमद्यथा चन्द्रमा नक्षत्रैर्वरुणाय समनम-दद्भ्यः समनमद्यथा ॥ [५०] ॥ वरुणोऽद्भिः साम्ने समनमदृचे समनमद्यथा सामर्चा ब्रह्मणे समनमत् क्षत्राय समनमद्यथा ब्रह्म क्षत्रेण राज्ञे समनमद्विशे समनमद्यथा राजा विशा रथायः समनमदश्वेभ्यः समनमद्यथा रथोऽश्वैः प्रजापतये समनमद्भूतेभ्यः समनमद्यथा प्रजा-पतिर्भूतैः समनमदेवम्मह्यम्भद्राः संनतयः सन्नमन्तु ॥ [५१] ॥

(अद्भ्यः समनमद्यथामह्यंचत्वारि च) ॥ २३ ॥

ये ते पन्थानः सवितः पूर्व्यासोऽरेणवो वितता अन्तरिक्षे। तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च देव ब्रूहि॥ नमोऽग्नये पृथिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमो वायवेऽन्तरिक्षक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि नमः सूर्याय दिविक्षिते लोकस्पृते लोकमस्मै यजमानाय देहि ॥ [५२] ॥

(ये ते चतुश्चत्वारिंशत्) ॥ २४ ॥

योवा अश्वस्य मेद्ध्यस्य शिरो वेद शीर्षण्वान् मेद्ध्यो भवत्युषा वा अश्वस्य मेद्ध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणश्चन्द्रमाः श्रोत्रन्दिशः पादा अवान्तरदिशाः पर्शवोऽहोरात्रे निमेषोऽर्धमासाः पर्वाणि मासाः सधानान्यृतवोऽङ्गानि संवथ्सर आत्मा रश्मयः केशा नक्षत्राणि रूपन्तारका अस्थानि नभो माꣳसान्योषधयो लोमानि वनस्पतयो वाला अग्निर्मुखवैँश्वानरो व्यात्तꣳ ॥ [५३] ॥ समुद्र उदरमन्तरिक्षम्पायुर्द्यावापृथिवी आण्डौ ग्रावा शेपः सोमो रेतो यज्जञ्भ्यते तद्वि द्योतते यद्विधूनुते तथ् स्तनयति यन्मेहति तद्वर्षति वागेवास्य वागहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनम्महिमा पश्चादनु जायत एतौ वै महिमाना वश्वमभितः सम्बभूवतुर्हयो देवानवह दर्वाऽसुरान् वाजी गन्धर्वानश्वोमनुष्यान्थ् समुद्रो वा अश्वस्य योनिः समुद्रो बन्धुः ॥ [५४] ॥

(व्यात्त मवहद् द्वादश च) ॥ २५ ॥

समाप्ति कोर्वैः

(गावो गावः सिषासन्तीः प्रथमे मासि संमान्यो यदि सोमौ षडहै रुथ् सृज्या(३)न् देवाना मर्क्यैण चर्माऽवं पृथिव्यै दत्वते कस्त्वा ऽग्नये यो वै यः प्राणतो य आत्मदा आ ब्रह्म न्नाऽक्रान् जज्ञि बीजं माग्नेयोऽष्टाकपालो ऽग्नयेऽꣳहोमुचेऽष्टाकपालो ऽग्नयेसमनमद् ये ते पन्थानो यो वा अश्वस्यमेद्ध्यस्य शिरः पञ्चविꣳशतिः)

(गावः समान्यः सवनमष्टाभि र्वा एते देवकृतश्चा ऽभिजित्या इत्याहु र्वरुणोऽद्भिः साम्ने चतुष् पञ्चासत्)

(गावः समुद्रो बन्धुः)

(प्रजननꣳ साद्याः प्रजवं बृहस्पति र्गावः पञ्च)

(इषे वायव्यं प्रजापति र्युञ्जानाः सावित्राणि प्राचीनवꣳशो प्रजननꣳ सप्त)

॥ हरिः ॐ ॥

सप्तमकाण्डे पञ्चमः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
२५	५४

ॐ